"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बालपत्रकः, पुं, (बालपत्र एव । स्वार्थे कन् ।) खदिरवृक्षः । इति त्रिकाण्डशेषः ॥

बालपाश्या, स्त्री, (बालपाशे केशसमूहे साधुः तत्र साधुरिति यत् ।) सीमन्तिकास्थितस्वर्णादिरचितपट्टिका । सिँथी इति भाषा । तत्पर्य्यायः । पारितथ्या २ । इत्यमरः ।२।६।१०३॥ बालपाश्यास्थितमणिः । इति तट्टीकायां तर्कवागीशः ॥

बालपुष्पिका, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः । ततः स्वार्थे कन् कापि अत इत्वम् ।) यूथिका । इति राजनिर्घण्टः ॥ (विवृतिरस्या यूथिकाशब्दे निर्द्दिष्टा ॥)

बालपुष्पी, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः सा ।) यूथिका । इति जटाधरः ॥

बालभद्रकः, पुं, (बालेऽपि भद्र इव । ततः स्वार्थे कन् ।) विषभेदः । तत्पर्य्यायः । प्राग्भवः २ । इति शब्दचन्द्रिका ॥

बालभैषज्यं, क्ली, (बालं भैषज्यम् । यद्वा, बालस्य शिशोर्भैषज्यम् ।) रसाञ्जनम् । इति राजनिर्घण्टः ॥ बालकस्यौषधञ्च ॥ (तद्यथा,—
"भैषज्यं पूर्व्वमुद्दिष्टं नराणां यज्ज्वरादिषु ।
कार्य्यन्तदेव बालानां मात्रा तस्य कनीयसी ॥"
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)

बालभोज्यः, पुं, (बालानां भोज्यः ।) चणकः । इति राजनिर्घण्टः ॥ बालकभक्ष्यद्रव्ये, त्रि ॥

बालमूषिका, स्त्री, (बाला क्षुद्रा मूषिका इन्दुरः ।) क्षुद्रमूषिका । छिट्का इन्दुर इति भाषा । तत्पर्य्यायः । गिरिका २ । इत्यमरः ।२।५।१२॥ चिक्कः ३ वेश्मनकुलः ४ चिक्का ५ । इति शब्दरत्नावली ॥

बालयज्ञोपवीतकं, क्ली, (बालं यज्ञोपवीतम् । ततः स्वार्थे कन् ।) उपवीतविशेषः । तत्पर्य्यायः । उरस्कटः २ पञ्चवटः ३ । इति त्रिकाण्डशेषः ॥

बालराजं, क्ली, (बालः स्वल्पोऽपि राजते इति । राज + पचाद्यच् ।) वैदूर्य्यम् । इति शब्दरत्नावली ॥ बालकश्रेष्ठे, पुं ॥

बालरोगः, पुं, (बालस्य रोगः ।) बालकस्य व्याधिः । तस्य निदानं लक्षणानि चाह ।
"धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा ।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदूष्यति ॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः ।
दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः ॥*॥
वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः ।
क्षामस्वरः कृशाङ्गः स्यात् बद्धविण्मूत्रमारुतः ॥
स्विन्नो भिन्नमलो बालः कामलापित्तरोगवान् ।
तृष्णालुरुष्णसर्व्वाङ्गः पित्तदुष्टं पयः पिबन् ॥
श्लेष्मदुष्टं पिबन् क्षीरं लालालुः श्लेष्मरोगवान् ।
निद्रार्दितो जड़ः शूनवक्त्राक्षश्छर्द्दनः शिशुः ॥
ज्वराद्या व्याधयः सर्व्वे वर्त्तन्ते महतान्तु ये ।
बालानामपि ते तद्वद्बोद्धव्या भिषगुत्तमैः ॥
बालानामेव ये रोगा भवन्ति महतां न च ।
तालुकण्टकमुख्यांस्तानवधारय यत्नतः ॥"
तत्रादौ तालुकण्टकमाह ।
"तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम् ।
तेन तालुप्रदेशस्य निम्नता मूर्द्ध्नि जायते ॥
तालुपातात् स्तनद्वेषः कृच्छ्रात् पानं शकृद्द्रवम् ।
तृड़क्षिकण्ठास्यरुजा ग्रीवादुर्द्धरता वमिः ॥"
पानं स्तन्यस्य । शकृद्द्रवं द्रवरूपम् ॥
अथ महापद्ममाह ।
"विसर्पस्तु शिशोः प्राणनाशनः शीर्षवस्तिजः ।
पद्मवर्णो महापद्मरोगो दोषत्रयोद्भवः ।
शङ्खाभ्यां हृदयं याति हृदयाच्च गुदं व्रजेत् ॥"
पद्मवर्णः लोहितवर्णः तत्र शीर्षजो विसर्पः शङ्खाभ्यां हृदयं याति हृदयात् गुदं व्रजेत् । एवं वस्तितो गुदं याति । गुदतो हृदयं हृदयाच्छिरो याति इति बोद्धव्यम् ॥
अथ कुकूणकमाह ।
'कुकूणकः क्षीरदोषात् शिशूनामेव वर्त्मनि ।
जायते तेन तन्नेत्रं कण्डुरं प्रस्रवेन्मुहुः ॥
शिशुः कुर्य्याल्ललाटाक्षिकूटनासाप्रघर्षणम् ।
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः ॥'
कुकूणकः कोथुया इति लोके ख्यातः ॥ * ॥
अथ तुण्डिगुदपाकमाह ।
'वातेनाध्मापिता नाभिः सरुजा तुण्डिरुच्यते ।
बालस्य गुदपाकाख्यो व्याधिः पित्तेन जायते ॥'
अथाहिपूतनं चाह ।
'शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत् ।
स्विन्ने वा स्नाप्यमानस्य कण्डू रक्तकफोद्भवा ॥
कण्डूयनात्ततः क्षिप्रं स्फोटाः स्रावश्च जायते ।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम् ॥
स्विन्ने स्वेदिते ॥ * ॥ अथाजगल्लीमाह ।
स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका ॥'
ग्रथिता गुम्फितेव । मुद्गसन्निभा । मुद्गाकृतिः ॥
अथ पारिगर्भिकमाह ।
'मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि ।
कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः ॥
युज्यते कोष्ठवृद्ध्या च तमाहुः पारिगर्भिकम् ।
रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम् ॥'
पिबन्नपीत्यपिशब्दादपिबन्नपि पारिगर्भिकः ।
अहोड़ी इति लोके ।
परिभवाख्यं परिभवेति नामान्तरम् ॥ * ॥
अथ दन्तोद्भेदकान् रोगानाह ।
'दन्तभेदः शिशोः सर्व्वरोगाणां कारणं स्मृतम् ।
विशेषाज्ज्वरविड्भेदकासच्छर्द्दिशिरोरुजम् ॥
अभिष्यन्दस्य पोथक्या विसर्पस्य च जायते ॥'
कारणमित्यन्वयः । पोथक्याः वर्त्मरोगविशेषस्य ॥
अथ बालरोगाणां चिकित्सा ।
'भैषज्यं पूर्व्वमुद्दिष्टं महतां यज्ज्वरादिषु ।
तदेव कार्य्यं बालानां किन्तु दाहादिकं विना ॥'
दाहादिकं विना अग्निदाहादिक्षारवमनविरेचनशिराव्यधादिकं विना । महाकष्टे चोत्पन्ने वमनविरेकाद्यं दद्यात् । यत आह सुश्रुतः ।
विरेकवस्तिवमनान्यृते कुर्य्याच्च नात्ययादिति ।
अत्ययात् विनाशकारकष्टात् ऋते विना ॥
'त एवं दोषा दूष्याश्च ज्वराद्या व्याधयश्च ते ।
अतस्तदेव भैषज्यं मात्रा तस्य कनीयसी ॥'
तस्य बालस्य । कनीयसीमात्रामाह विश्वामित्रः ।
'विड़ङ्गफलमात्रन्तु जातमात्रस्य भेषजम् ।
अनेनैव प्रमाणेन मासि मासि प्रवर्द्धयेत् ॥'
विड़ङ्गपरिमितं भेषजं चूर्णीकृत्य किंवा कल्कीकृत्यावलेहीकृत्य दद्यादित्यर्थः । तन्त्रान्तरे त्वन्यथाभिहितम् ।
'प्रथमे मासि बालाय देया भेषजरक्तिका ।
अवलेह्या तु कर्त्तव्या मधुक्षीरसिताघृतैः ॥
एकैकां वर्द्धयेत्तावद्यावत् संवत्सरो भवेत् ।
तदूर्द्ध्वं माषवृद्धिः स्याद्यावत् षोड़शवत्सराः ॥'
एकैकां रक्तिकाम् तदूर्द्ध्वं वर्षोपरि माषवृद्धिः प्रतिवर्षं पञ्चगुञ्जात्मकस्य माषस्य वृद्धिर्भवति । गुञ्जाः पञ्चाद्यमाषक इत्यमरसिंहः ॥
'ततः स्थिरा भवेत्तावद्यावद्वर्षाणि सप्ततिः ।
ततो बालकवन्मात्रा ह्रासनीया शनैः शनैः ॥'
ततः षोड़शवत्सरोपरि ।
'चूर्णकल्कावलेहानामियं मात्रा प्रकीर्त्तिता ।
कषायस्य पुनः सैव विज्ञातव्या चतुर्गुणा ॥
क्षीरपस्य शिशोर्देयमौषधं क्षीरसर्पिषा ।
धात्र्यास्तु केवलं देयं न क्षीरेणापि सर्पिषा ॥'
क्षीराशादस्य पूर्व्ववत् क्षीरसर्पिषा । प्रकारान्तरेणौषधपानमाह सुश्रुतः ।
'येषां गदानां ये योगाः प्रवक्ष्यन्ते गदङ्कराः ।
तेषु तत्कल्कसंलिप्तौ पाययेत शिशुं स्तनौ ॥'
अवचनानां बालानामभ्यन्तरव्याधिज्ञानोपायमाह ।
'अङ्गप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते ।
मुहुर्मुहुः स्पृशति तं स्पृश्यमानेन रोदिति ॥
निमीलिताक्षो मूर्द्धस्थे रोगे नो धारयेच्छिरः ।
वस्तिस्थे मूत्रसङ्गार्त्तो क्षुधालुरपि गच्छति ॥
विण्मूत्रसङ्गवैकल्यच्छर्द्द्याध्मानान्त्रकूजनैः ।
कोष्ठे व्याधीन् विजानीयात् सर्व्वत्रस्थांश्च रोदनैः ॥'
अथादौ ज्वरस्य चिकित्सामाह ।
'सर्व्वं निर्वापयेत् बाले स्तन्यं नैव निवारयेत् ।
मात्रया लङ्घयेद्धात्रीं शिशोरेतद्विलङ्घनम् ॥'
मात्रया लङ्घयेत् लघु भोजयेत् ।
'भद्रमुस्ताभयानिम्बपटोलमधुकैः कृतः ।
क्वाथः कोष्णः शिशोरेष निःशेषज्वरनाशनः ॥'
भद्रमुस्तादिक्वाथः सर्व्वज्वरेषु ॥ * ॥
'घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयुतम् ।
शिशोर्ज्वरातिसारघ्नं कासं श्वासं वमिं हरेत् ॥
अरुणा अतिविषा । चतुर्भद्रिका ज्वरातिसारेषु ॥